https://universitynews.in/



# M.A. (Previous) Examination, 2023
# SANSKRIT
## Second Paper II
## (ललितसाहित्यं साहित्यशास्त्रम् च)

Duration of Examination: 3 Hours
परीक्षा की अवधि: 3 घण्टा

Max. Marks: 100
पूर्णांक: 100

**Instructions to the Candidates:**
परीक्षार्थी के लिए निर्देश:-

नोट: सभी प्रश्न करना अनिवार्य है

---

प्र.1. (अ) अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भ व्याख्या कार्या- 7½+7½=15

(i) प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी,
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै,
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार

(ii) दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां,
प्रत्यूषेषु स्फुटितकमलामोद मैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानि मङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः।।

(iii) यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि,
ज्योतिश्छाया कुसुमरचितान्युत्तमस्त्रीसहायाः।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु।।

(iv) यत्र श्यामा दिनकरहयस्पर्धिनो यत्र वाहाः,
शैलोदग्रास्त्वमिव करिणोवृष्टिमन्तः प्रभेदात्।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः।।

1(आ) मेघदूतस्य कथावस्तु स्वशब्दैः लिखत। (संस्कृतेन) 10

अथवा

मेघदूतस्य कालिदासस्य प्रकृतिचित्रणं विवेच्यताम्।

प्र.2. (अ) कयोश्चिद् द्वयोः श्लोकयोः सप्रसंङ व्याख्या करणीया- 7½+7½=15

(i) सुखं हि दुःखान्यनुभूय शोभते,
घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु योयाति नरो दरिद्रतां
धृतः शरीरेण मृतः सः जीवति।।

(ii) न गणयति पराभवं कुतश्चिद् हरति ददाति च नित्यमर्थजातम्।
नृपतिरिव निकाममायदर्शी विभववता समुपास्यते जनेन।।



https://universitynews.in/

https://universitynews.in/



(iii) अपद्मा श्रीरेषा प्रहरणमनङ्गस्य ललितं,
कुलस्त्रीणां शोको मदनवरवृक्षस्य कुसुमम्
सलीलं गच्छन्ती रतिसमयलज्जाप्रणयिनी,
रतिक्षेत्रे रङ्गे प्रियपथिक सार्थैरनुगता।।

(iv) शुष्का अति प्रदेशा अस्य किं विनमितमस्तकेन कर्त्तव्यम्।
राहुगृहीतोऽपो चन्द्रो न वन्दनीयो जनपदस्य।।

2(आ) मृच्छकटिकमधिकृत्य केषाञ्चन पञ्चप्रश्नानां संस्कृतेन उत्तराणि लेखनीयानि। 2x5=10

(i) मृच्छकटिकं नाटके कति अङ्को?
(ii) मृच्छकटिकस्य लेखक: क:?
(iii) मृच्छकटिकस्य नायिका का?
(iv) नाटकेऽस्मिन् प्रतिनायकस्य नाम किम्?
(v) धूता कस्य पत्नी अस्ति?
(vi) चारूदत्तस्य पुत्रस्य नाम किम्?
(vii) मृच्छकटिकस्य प्रथम अङ्कस्य नाम किम्?
(viii) कस्य सर्वं शून्यं भवति?
(ix) चारूदत्तस्य सेवकस्य नाम किम्?
(x) मृच्छकटिकं नाटके गणिका का वर्तते?

प्र.3. (अ) कयोश्चिद् द्वयो: ससन्दर्भ अनुवाद: विधेय: - 7½+7½=15

(i) एकदा तु वासतेय्यास्तुरीये यामे, प्रत्युषस्येव स्वप्ने दवहुतभुजा दह्यमानं केसरिणमद्राक्षत्। तस्मिन्नेव दावदहने समुत्सृज्य शावकान् उत्प्लुत्य चात्मानं पातयन्तीं सिंहीमप्यपश्यत्। प्रबुद्धस्य चास्य मुहुर्मुहुः दक्षिणेतरत् अक्षि पस्पन्दे।

(ii) सोऽब्रवीत् - ''नास्ति इदानीम्। यदि भवेत्कुमारं दृष्ट्वा'' इति। मन्दं मन्दं प्रणम्यमानश्च द्वारपालै:, दीयमानसर्वस्वम्, पूजयमानकुलदैवतम्, प्रयतविप्रप्रस्तुतसंहिताजपम्, कथ्यमानकष्टपार्थिवावस्थं राजकुलं विवेश।

(iii) अस्मिन्नहनि, ''क कुमार:, क कुमार:'' इति प्रतिपुरुषं पृच्छन्ती वेलेति नाम्ना यशोवत्या: प्रतिहारी समीपमस्याजगाम। उपसृत्य च, ''देव परित्रायस्व परित्रायस्व। जीवत्येव भर्तरि, किमप्यध्यवसितं देव्या'' इति विज्ञापितवती ततस्तदाकर्ण्य, च्युत इव सत्त्वेन, द्रुत इव दु:खेन, अप्रतिपत्रिरासीत्।

(iv) राजा तु तम् उपरूध्यमानदृष्टि: आविरतरूदितशब्दाश्रितश्रवण: प्रत्यभिज्ञाय शनै: शनैश्वादीत्-''पुत्र नार्हस्येवं भवितुम। सत्त्ववतां चाग्रणी सर्वातिशयाश्रित: क भवान्,क वैक्लव्यम्'' इत्येवं वदन्नेव अपुनरून्मीलनाय निमिमील राजसिंहो लोचने।

(आ) हर्षचरितमधिकृत्य 'बाणोच्छिष्टं जगत्सर्वं'' इति समीक्ष्यताम्। 10

अथवा

हर्षचरितस्य पञ्चम उच्छ्वासस्य कथां सारं स्वशब्दै: लिखत।

प्र.4. (अ) निम्नलिखित कारिकासु कयोश्चिद् द्वयो: सप्रसंङ व्याख्या कार्या- 7½+7½=15

(i) वाक्यं रसात्मकं काव्यं, दोषा: तस्यापकर्षका:।
उत्कर्षहेतव प्रोक्ता, गुणालङ्काररीतय:।।

(ii) वाच्योऽर्थोऽभिधया बोध्यो, लक्ष्यो लक्षणया मत:।
व्यङ्ग्यो व्यञ्जनया ता, स्युस्तिस्र: शब्दस्य शक्तय:।

(iii) अनेकार्थस्य शब्दस्य, संयोगाद्यैर्नियन्त्रिते
एकत्रार्थेऽन्यधीहेतु व्यञ्जना साऽभिधात्रया।।

(iv) करूणादावपि रसे जायते यत्परं सुखम्।
सचेतसामनुभव: प्रमाणं तत्र केवलम्।।

(आ) कयोश्चिद् द्वयो: टिप्पणी लेख्या- 5+5=10

(i) वाक्यम् (ii) उपादान लक्षणा (iii) रसस्य अलौकिकत्वम् (iv) काव्यप्रयोजनम्

* * * * *



https://universitynews.in/